श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

# ॥ श्री षोडशायुधस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री षोडशायुधस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

स्वसङ्कल्पकलाकल्पैरायुधैरायुधेश्वरः।
जुष्टः षोडशभिर्दिव्यैर्जुषतां वः परः पुमान् ॥ 1 ॥

यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम्।
पातु वस्तत् परं चक्रं चक्ररूपस्य चक्रिणः ॥ 2 ॥

यत्प्रसूतिशतैरासन् रुद्राः परशुलाञ्छनाः।
स दिव्यो हेतिराजस्य परशुः परिपातु वः ॥ 3 ॥

हेलया हेतिराजेन यस्मिन् दैत्याः समुद्धृते।
शकुन्ता इव धावन्ति स कुन्तः पालयेत वः ॥ 4 ॥

दैत्यदानवमुख्यानां दण्ड्यानां येन दण्डनम्।
हेतिदण्डेशदण्डोऽसौ भवतां दण्डयेद्द्विषः ॥ 5 ॥

अनन्यान्वयभक्तानां रुन्धन्नाशामतङ्गजान्।
अनङ्कुशविहारो वः पातु हेतीश्वराङ्कुशः ॥ 6 ॥

सम्भूय शलभायन्ते यत्र पापानि देहिनाम्।
स पातु शतवक्त्राग्निहेतिर्हेतीश्वरस्य वः ॥ 7 ॥

अविद्यां स्वप्रकाशेन विद्यारूपश्छिनत्ति यः।
स सुदर्शननिस्त्रिंशस्सौतु वस्तत्त्वदर्शनम् ॥ 8 ॥

क्रियाशक्तिगुणो विष्णोर्यो भवत्यतिशक्तिमान्।
अकुण्ठशक्तिः सा शक्तिरशक्तिं वारयेत वः॥ **9** ॥

तारत्वं यस्य संस्थाने शब्दे च परिदृश्यते।
प्रभोः प्रहरणेन्द्रस्य पाञ्चजन्यः स पातु वः॥ **10** ॥

यं सात्त्विकमहङ्कारम् आमनन्त्यक्षसायकम्।
अव्याद्वश्चक्ररूपस्य तद्धनुः शार्ङ्गधन्वनः॥ **11** ॥

आयुधेन्द्रेण येनैव विश्वसर्गो विरच्यते।
स वः सौदर्शनः कुर्यात् पाशः पाशविमोचनम्॥ **12** ॥

विहारो येन देवस्य विश्वक्षेत्रकृषीवलः।
व्यज्यते तेन सीरेण नासीरविजयोऽस्तु वः॥ **13** ॥

आयुधानामहं वज्रं इत्यगीयत यः स वः।
अव्याद्धेतीशवज्रोऽसौ अदधीच्यस्थिसम्भवः॥ **14** ॥

विश्वसंहृतिशक्तिर्या विश्रुता बुद्धिरूपिणी।
सा वः सौदर्शनी भूयात् गदप्रशमनी गदा॥ **15** ॥

यात्यतिक्षोदशालित्वं मुसलो येन तेन वः।
हेतीशमुसलेनाशु भिद्यतां मोहमौसलम्॥ **16** ॥

शूलिदृष्टमनोर्वाच्यो येन शूलयति द्विषः।
भवतां तेन भवतात् त्रिशूलेन विशूलता॥ **17** ॥

अस्त्रग्रामस्य कृत्स्नस्य प्रसूतिं यं प्रचक्षते।
सोऽव्यात् सुदर्शनो विश्वं आयुधैः षोडशायुधः॥ **18** ॥

**श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम्।**
**कृतेयमायुधेन्द्रस्य षोडशायुधसंस्तुतिः॥ 19॥**

॥ इति श्री षोडशायुधस्तोत्रं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥